# Kumarakrita Shivashiva Stuti

# કુમારકૃતા શિવશિવાસ્તુતિઃ

## Document Information

Text title : Kumarakrita Shivashiva Stuti

File name : shivashivAstutiHkumArakRRitA.itx

Category : shiva, stuti, shivarahasya, devii, pArvatI

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 21| 4-15 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# કુમારકૃતા શિવશિવાસ્તુતિઃ

નમો નમસ્તે ગિરિશાય તુભ્યં નમો નમસ્તે ગિરિકન્યકાયૈ ।
નમો નમસ્તે વૃષભધ્વજાય સિંહધ્વજાયૈ ચ નમો નમસ્તે ॥ ૧॥

નમો નમો ભૂતિવિભૂષણાય નમો નમશ્ચન્દનરૂપિતાયૈ ।
નમો નમઃ ભાલવિલોચનાય નમો નમઃ પદ્મવિલોચનાયૈ ॥ ૨॥

ત્રિશૂલહસ્તાય નમો નમસ્તે નમો નમઃ પદ્મલસત્કરાયૈ ।
નમો નમો દિગ્વસનાય તુભ્યં ચિત્રામ્બરાયૈ ચ નમો નમસ્તે ॥ ૩॥

ચન્દ્રાવતંસાય નમો નમસ્તે નમોઽસ્તુ ચન્દ્રાભરણાઞ્ચિતાયૈ ।
નમઃ સુવર્ણાઙ્કિતકુણ્ડલાય નમોઽસ્તુ રત્નોજ્વલકુણ્ડલાયૈ ॥ ૪॥

નમોઽસ્તુ તારાગ્રહમાલિકાય નમોઽસ્તુ હારાન્વિતકન્ધરાયૈ ।
સુવર્ણવર્ણાય નમો નમસ્તે નમઃ સુવર્ણાધિકસુન્દરાયૈ ॥ ૫॥

નમો નમસ્તે ત્રિપુરાન્તકાય નમો નમસ્તે મધુનાશનાયૈ ।
નમો નમસ્ત્વન્ધકસૂદનાય નમો નમઃ કૈટભસૂદનાયૈ ॥ ૬॥

નમો નમો જ્ઞાનમયાય નિત્યં નમશ્ચિદાનન્દઘનપ્રદાયૈ ।
નમો જટાજૂટવિરાજિતાય નમોઽસ્તુ વેણીફણિમણ્ડિતાયૈ ॥ ૭॥

નમોઽસ્તુ કર્પૂરરસાકરાય નમો લસત્કુઙ્કુમમણ્ડિતાયૈ ।
નમોઽસ્તુ બિલ્વામ્રફલાર્ચિતાય નમોઽસ્તુ કુન્દપ્રસવાર્ચિતાયૈ ॥ ૮॥

નમો જગન્મણ્ડલમણ્ડનાય નમો મણિભ્રાજિતમણ્ડનાયૈ ।
નમોઽસ્તુ વેદાન્તગણસ્તુતાય નમોઽસ્તુ વિશ્વેશ્વરસંસ્તુતાયૈ ॥ ૯॥

નમોઽસ્તુ સર્વામરપૂજિતાય નમોઽસ્તુ પદ્માર્ચિતપાદુકાયૈ ।
નમઃ શિવાઽઽલિઙ્ગિતવિગ્રહાય નમઃ શિવાલિઙ્ગિતવિગ્રહાયૈ ॥ ૧૦॥

નમો નમસ્તે જનકાય નિત્યં નમો નમસ્તે ગિરિજે જનન્યૈ ।
નમો નમોઽનઙ્ગહરાય નિત્યં નમો નમોઽનઙ્ગવિવર્ધનાયૈ ॥ ૧૧॥

નમો નમસ્તેઽસ્તુ વિષાશનાય નમો નમસ્તેસ્તુ સુધાશનાયૈ ।
નમો નમસ્તેઽસ્તુ મહેશ્વરાય શ્રીચન્દને દેવિ નમો નમસ્તે ॥ ૧૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે કુમારકૃતા શિવશિવાસ્તુતિઃ સમ્પૂર્ણા ॥

શિવનૈવેદ્યશિવોચ્છિષ્ટપાત્રમહિમ્નવર્ણનં
- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૨૧। ૪-૧૫ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 21. 4-15 ..

Proofread by Ruma Dewan

---

*Kumarakrita Shivashiva Stuti*

pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*